## सोऽस्य निवासः। (८९/१४६९)

सः इति प्रथमासमर्थात् अस्य इति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति, यत् प्रथमासमर्थं निवासः चेत् [1]स भवति। निवसन्त्यस्मिन् [2]निवासो देश उच्यते। स्रुघ्नो निवासोऽस्य स्रौघ्नः। माथुरः। [3]राष्ट्रियः॥

## अभिजनश्च। (९०/१४७०)

सोऽस्य इत्येव। स इति प्रथमासमर्था[4]दस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति, यत् प्रथमासमर्थमभिजनश्चेत् स भवति। [5]अभिजनः पूर्वबान्धवः। तत्सम्बन्धाद् देशोऽपि अभिजनः इति उच्यते, यस्मिन् पूर्वबान्धवैरुषितम्। [6]तस्मादिह देशवाचिनः प्रत्ययः, न बन्धुभ्यो, [7]निवासप्रत्यासत्तेः। स्रुघ्नोऽभिजनोऽस्य स्रौघ्नः। माथुरः। [8]राष्ट्रियः। निवासाभिजनयोः को विशेषः? यत्र संप्रत्युष्यते स निवासः[9], यत्र पूर्वैरुषितं सोऽभिजनः (म. भा. २.३१४)। योगविभाग उत्तरार्थः॥

## आयुधजीविभ्यश्छः [10]पर्वते। (९१/१४७१)

सोऽस्याभिजनः इति[11] वर्तते। आयुधजीविभ्यः इति तादर्थ्ये चतुर्थी, पर्वते इति प्रकृतिविशेषणम्। पर्वतवाचिनः प्रथमासमर्थादभिजनादस्येति षष्ठ्यर्थे छः प्रत्ययो भवति। [आयुधजीविभ्यः [12]आयुधजीव्यर्थमायुधजीविनोऽभिधातुं प्रत्ययो भवति इत्यर्थः। [13]हृद्गोलः पर्वतोऽभिजनः एषामायुधजीविनां हृद्गोलीयाः[14]। अन्धकवर्तीयाः। रोहितगिरीयाः। [15]आयुधजीविभ्यः इति किम्? ऋक्षोदः पर्वतोऽभिजनः एषां ब्राह्मणानाम् आर्क्षोदा ब्राह्मणाः। [16]पर्वते इति किम्? सांकाश्यका आयुधजीविनः॥

## शण्डिकादिभ्यो ञ्यः। (९२/१४७२)

शण्डिक इत्येवमादिभ्यः प्रातिपदिकेभ्यः ञ्यः प्रत्ययो भवति सोऽस्याभिजनः इत्येतस्मिन् विषये। [17]अणादेरपवादः। शाण्डिक्यः। [18]सार्वसेन्यः।

शण्डिक। सर्वसेन। सर्वकेश। शक। [19]सट। रक। शङ्ख। बोध। शण्डिकादिः॥

## सिन्धुतक्षशिलादिभ्योऽणञौ। (९३/१४७३)

आदिशब्दः प्रत्येकमभिसम्बध्यते। सिन्ध्वादिभ्यः [20]प्रातिपदिकेभ्यः तक्षशिलादिभ्यश्च यथासङ्ख्यम् अण्अञौ प्रत्ययौ भवतः सोऽस्याभिजनः इत्येतस्मिन् विषये। सैन्धवः। वार्णवः।

---

1. स नास्ति ब. 2. इति इत्यधिकम् ब.क.फ. 3. राष्ट्रीयः ह. 4. प्रातिपदिकात् इत्यधिकम् ह. 5. अभिजनाः पूर्वबान्धवाः ब.फ.ह, पूर्वे बान्धवाः इ. 6. तदिह फ. 7. अस्य इत्यधिकम् फ, सम्बध्यते इत्यधिकम् क. 8. राष्ट्रीयः फ.ह. 9. इति भावः इत्यधिकम् फ. 10. पर्वतात् ब. 11. च इत्यधिकम् फ. 12. च इत्यधिकम् अ.ड.फ.ह. 13. हृद्गोलपवर्तः ब, हृदगोलपर्वतः क. 14. भोजकटीयाः अनूकवनीयाः लोहितगिरीयाः इत्यधिकम् ड. 15. वाक्यमिदं नास्ति ह. 16. पर्वतात् फ.ह. 17. अणोऽपवादः क. 18. सार्वसैन्यः ब. 19. शट ब.इ. 20. प्रातिपदिकेभ्यः नास्ति ब.